# Shri Bala Ashtottarashatanamastotram 1

# श्रीबालाष्टोत्तरशतनामस्तोत्रम् १

## Document Information

Text title : bAlAtripurasundarI aShTottarashatanAmastotra

File name : bAlA108str.itx

Category : aShTottarashatanAma, devii, dashamahAvidyA, devI

Location : doc_devii

Transliterated by : Satish Arigela

Proofread by : Satish Arigela, PSA Easwaran

Description-comments : bAlAsaparyA

Latest update : June 13, 2015, January 14, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# श्रीबालाष्टोत्तरशतनामस्तोत्रम् १

अगस्त्य उवाच -
हयग्रीव दयासिन्धो भगवन्भक्तवत्सल ।
बालात्रिपुरसुन्दर्या नाम्नामष्टोत्तरं शुभम् ।
वदस्व मे त्वं कृपया येन ज्ञानं प्रवर्तते ॥ १॥

हयग्रीव उवाच -
शृणु सम्यक्प्रवक्ष्यामि श्रीबालाष्टोत्तरं शतम् ।
सर्वविद्यात्मकं ज्ञेयं श्रीबालाप्रीतिदायकम् ॥ २॥

अस्य श्रीबालात्रिपुरसुन्दर्यष्टोत्तरशतनामस्तोत्रमहामन्त्रस्य
दक्षिणामूर्तिः ऋषिः । अनुष्टुप्छन्दः । श्री बालात्रिपुरसुन्दरी देवता ।
ऐं बीजम् । क्लीं शक्तिः । सौः कीलकम् ।
श्रीबालात्रिपुरसुन्दरीप्रसादसिद्ध्यर्थे नामपारायणे विनियोगः ।

अथ करन्यासः -
ॐ ऐं अङ्गुष्ठाभ्यां नमः । क्लीं तर्जनीभ्यां नमः ।
सौः मध्यमाभ्यां नमः । ऐं अनामिकाभ्यां नमः ।
क्लीं कनिष्ठिकाभ्यां नमः । सौः करतलकरपृष्ठाभ्यां नमः ।

अथ हृदयादिन्यासः -
ऐं हृदयाय नमः । क्लीं शिरसे स्वाहा । सौः शिखायै वषट् ।
ऐं कवचाय हुम् । क्लीं नेत्रत्रयाय वौषट् । सौः अस्त्राय फट् ।
भूर्भुवस्सुवरों इति दिग्बन्धः ।

ध्यानम्-
पाशाङ्कुशे पुस्तकाक्षसूत्रे च दधती करैः ।
रक्ता त्र्यक्षा चन्द्रफाला पातु बाला सुरार्चिता ॥

लमित्यादि पञ्चपूजा -

लं पृथिव्यात्मिकायै गन्धं समर्पयामि ।
हं आकाशात्मिकायै पुष्पाणि समर्पयामि ।
यं वाय्वात्मिकायै धूपमाघ्रापयामि ।
रं अग्न्यात्मिकायै दीपं दर्शयामि ।
वं अमृतात्मिकायै अमृतोपहारं निवेदयामि ।
सं सर्वात्मिकायै सर्वोपचारपूजाः समर्पयामि ॥

अथ श्री बाला अष्टोत्तरशतनामस्तोत्रम् ।
ॐ कल्याणी त्रिपुरा बाला माया त्रिपुरसुन्दरी ।
सुन्दरी सौभाग्यवती क्लीङ्कारी सर्वमङ्गला ॥ १॥

ह्रीङ्कारी स्कन्दजननी परा पञ्चदशाक्षरी ।
त्रिलोकी मोहनाधीशा सर्वेशी सर्वरूपिणी ॥ २॥

सर्वसंक्षोभिणी पूर्णा नवमुद्रेश्वरी शिवा ।
अनङ्गकुसुमा ख्याता अनङ्गा भुवनेश्वरी ॥ ३॥

जप्या स्तव्या श्रुतिर्नित्या नित्यक्लिन्नाऽमृतोद्भवा ।
मोहिनी परमाऽऽनन्दा कामेशतरुणा कला ॥ ४॥

कलावती भगवती पद्मरागकिरीटिनी ।
सौगन्धिनी सरिद्वेणी मन्त्रिणि मन्त्ररूपिणि ॥ ५॥

तत्त्वत्रयी तत्त्वमयी सिद्धा त्रिपुरवासिनी ।
श्रीर्मतिश्च महादेवी कौलिनी परदेवता ॥ ६॥

कैवल्यरेखा वशिनी सर्वेशी सर्वमातृका ।
विष्णुस्वसा देवमाता सर्वसम्पत्प्रदायिनी ॥ ७॥

किङ्करी माता गीर्वाणी सुरापानानुमोदिनी । (सुधापानविनोदिनी)
आधाराहितपत्नीका स्वाधिष्ठानसमाश्रया ॥ ८॥

अनाहताब्जनिलया मणिपूरासमाश्रया ।
आज्ञा पद्मासनासीना विशुद्धस्थलसंस्थिता ॥ ९॥

अष्टत्रिंशत्कलामूर्तिः स्सुषुम्ना चारुमध्यमा ।
योगेश्वरी मुनिध्येया परब्रह्मस्वरूपिणी ॥ १०॥

चतुर्भुजा चन्द्रचूडा पुराणागमरूपिनी ।

ऐंकारादिर्महाविद्या पञ्चप्रणवरूपिणी ॥ ११॥

भूतेश्वरी भूतमयी पञ्चाशद्वर्णरूपिणी ।
षोढान्यास महाभूषा कामाक्षी दशमातृका ॥ १२॥

आधारशक्तिः तरुणी लक्ष्मीः त्रिपुरभैरवी ।
शाम्भवी सच्चिदानन्दा सच्चिदानन्दरूपिणी ॥ १३॥

माङ्गल्य दायिनी मान्या सर्वमङ्गलकारिणी ।
योगलक्ष्मीः भोगलक्ष्मीः राज्यलक्ष्मीः त्रिकोणगा ॥ १४॥

सर्वसौभाग्यसम्पन्ना सर्वसम्पत्तिदायिनी ।
नवकोणपुरावासा बिन्दुत्रयसमन्विता ॥ १५॥

नाम्नामष्टोत्तरशतं पठेन्न्याससमन्वितम् ।
सर्वसिद्धिमवाप्नोती साधकोभीष्टमाप्नुयात् ॥ १६॥

इति श्री रुद्रयामलतन्त्रे उमामहेश्वरसंवादे
श्री बाला अष्टोत्तरशतनामस्तोत्रं सम्पूर्णम् ।

Encoded and proofread by Satish Arigela
Corrected by PSA Easwaran psaeaswaran at gmail
See corresponding nAmAvalI to help prayers.
There are different versions of stotram found
in the specified links.

*Shri Bala Ashtottarashatanamastotram 1*
pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*